M. T. B. COLLEGE, SURAT

Manuscripts Library

No. Ref. / Ser. 1399

Title: Nyaya-
worksom

1399

In Complete

	Nyaya Wak		Title
			Author
			Editor
8K			Year, Vols.
			Publisher
1399			Remarks

दिक्कादेस्तत्त्वं। समूहालंबनज्ञाने रूपोपि विशेषणं गुणत्वव्यक्तेर्न विषयतीति प्रयाः लक्षणकत्वेन तत्त्वनुपपत्तेरि
ति चेन्न। कायव्यूहस्य लोहकशरीरावच्छिन्नेवाध्यवुद्धौ शरीरं तदा वृद्धित्वे विशिष्टबुद्धेस्तादृस्यात्तच्चवाधे बुद्धौ भा
वविनाऽसंभवात्तादृग्हेतुः न च कायव्यूहवतः सार्वज्ञ्यापत्तिरेवेदं॥ अस्मदं तस्यापि कायव्यूहात्। सर्वं तस्यापि प्रगा
धानं विनामगसंभवात्॥ अन्यथास्य प्रभ्रमादित्तिभिन्नमोगानुपपत्तेः। एवं कामिनीजिज्ञासादेर्वैरोधित्वा
दिक्षुपात्रमपितत्त्वहेतुरितिदिक्॥ नन्वेवमपि रूपादेरव्याप्यवृत्तित्वं द्वयोरमलपेपार्थिवपरमाणावुत्पत्ति
कालेऽवयविनिरूपादिसामान्याभावसत्त्वादिति चेन्न। मानाभावात्। न घटत्वप्रत्यक्षं। सन्निकर्षाभावात्॥
न च चक्षुःसंयुक्तमहत्त्वविशेषणतायाः अभावेपि तादृशमहत्त्ववत्कपालसमवेतत्वविशेषणतास्त्येव।
तिवाच्यं द्रव्यवृत्त्यभाववाक्षुषे आधाराधेयहेतुत्वात् घटादावुत्पत्तिकाले निरुक्तसन्निकर्षेपि चहूती
पक्षरोविषयाभावात्। सन्निकर्षाभावाद्वा। नाप्यनुमानं अप्रयोजकत्वात्। न च रूपधारावारणाय रू
पंप्रतिकर्षेपि चहूती पक्षरोविषयाभावात्। सन्निकर्षाभावाद्वा। नाप्यनुमानं अप्रयोजकत्वात्

। न च रूपधारावारणाय रूपं प्रति रूपसामान्याभावस्य हेतुत्वात् न रूपोत्पत्तेः प्राक् तन्निवृत्तिः तत्त्वा
गभावस्य तत्र तत्समवायिनो चाक्षुषविगतत्वे तद्रूपे परमाणुवृत्तिरूपे च तत्त्वेन तः संयोगस्य हेतुत्वे
न तत्तत्क्षणवृत्तित्वविशिष्टकार्यत्वावच्छिन्ने तत्र तदव्यवहितप्राक्क्षणत्वेन हेतुत्वे न च रूपधाराया
असंभवात्।। प्रलये पार्थिवपरमाणूनामुत्पत्तिकाले घटादौ रूपं नास्तीति व्यवहारस्तु पाकजरूपप्र
तियोगिकसंसर्गाभावनिबंधन इति प्रांचः। तन्मते क्षणघटितावच्छेदकावच्छिन्नप्रतियोगिताक
त्वस्य व्युत्पत्तिसिद्धत्वात् पाकावच्छिन्नप्रतियोगिताकाभावनिरूढव्यवहारविषयः। न च ध्वंस
प्रागभावेतरयावत्संभवति न तदा तत्र बहूनां रूपाणामुत्पत्स्यमानत्वात् न सत्त्वाच्च। किंच विजा
तीयतेजःसंयोगस्य विजातीयरूपहेतुत्वे तत्तद्रूपं प्रति तत्तत्त्वेन हेतुत्वात् विशेषविकल्पे पर
माणौ न्यायनये चावयविन्यपि रूपधारावारणाय प्रागभावसत्त्वेऽपि तत्रत्यस्य पुनरुत्पत्तिवारणा
य च रूपत्वावच्छिन्नात्यन्ताभावस्य जन्यरूपहेतुरिति रूपादेरव्याप्यवृत्तित्वं दुर्वारं। एवमेकत्वा राम०

...त्वादिसामान्याभावस्य हेतुत्वात् घटादावुत्पत्तिकाले एकत्वादिसामान्याभावः सिद्धः स एव
गुणसामान्याभाव इति सोऽपि सिद्धः। इत्थं च प्रकृतलक्षणे एकदेशवृत्तित्वं स्वकालावच्छेदेन निरू
पकाधिकरणवृत्त्यत्यन्ताभावप्रतियोगित्वं नैव तद्रूपादौ चित्ररूपस्वीकारादिसाधुः।। ।।टिप्प
ण्योः पंचगुणवत्त्वं सर्वोत्पत्तिमन्निमित्तत्वं परत्वानुमेयत्वं चेति भाव्यं। पंचगुणाः संख्यापरिमा
णपृथक्त्वसंयोगविभागाः तद्वत्त्वं सर्वेषामुत्पत्तिमतां तत्तत्समवेतद्वित्वद्विपृथक्त्वादिसंयोगवि
भागभिन्नानां निमित्तकारणत्वमित्यर्थ इत्याचार्याः। वस्तुतो निमित्तकारणत्वं न समवाय्यसमवा
यिकारणान्यकारणत्वं किंतु समवायासमवायिकारणतान्यकारणतावत्त्वं समवायिकारणत्वं
समवायसंबंधावच्छिन्नकार्यताप्रतियोगिकतादात्म्यसंबंधावच्छिन्नकारणत्वं तथा च यदि कपाल
ः समवायेन स्वसमवेतद्वित्वादिकं प्रति समवायिकारणत्वेऽपि दैशिककालिकविशेषणता
न्तमात्रं प्रति निमित्तकारणत्वमव्याहतमेवेति बोध्यं। यद्यपि सर्वोत्पत्तिमन्निमित्तत्वमदृष्टे

मा॰

…द्रावत्ति मात्रं॥ तद्व्याप्याधिकरणत्वमनिमित्तत्वमत्र विवक्षितं। न चैतदस्पष्टग्राविति भावः।
…तैजसयोर्नैमित्तिकद्रवत्वं क्षितौ घृतादौ स्वर्णादौ च तैजसे द्रवत्वमस्तीति नैमित्तिकद्रवत्ववृत्ति
…व्याप्यजातिमत्त्वं तयोर्लक्षणमिति न घटादावव्याप्तिरिति बोध्यं। क्षितिभिन्नद्रव्यत्वमष्टा
न द्रव्य जलादिभिन्नद्रव्यत्वमपि क्षितिभिन्नानां निर्गंधत्वं। अंभोविहायानि स्नेहत्वात्तेजोविहाय
उष्णत्वमग्राहकत्वं च। एवमात्मानं विहाय परार्थत्वमचेतनत्वं चेत्यादि। जलज्योतिः शिलानामपाक
स्पर्शवत्त्वं। जलज्योतिषोर्भास्वरशुक्लरूपवत्त्वं। दिक्कालमनसां विशेषगुणशून्यत्वं। वाय्वादीना
मतीन्द्रियाणामसत्त्वं नीरूपत्वं नीरूपत्वं च। आत्मभिन्नानामेवामतीन्द्रियत्वं। आकाशादीनां निः
स्पर्शत्वं कालादीनाममूर्तत्वमित्यादि॥ अथ गुणानां साधर्म्यं। तत्र सामान्येन गुणत्वं। रूपर
सगंधस्पर्शपरत्वापरत्वगुरुत्वद्रवत्वस्नेहभावनाख्यसंस्काराणां मूर्तगुणत्वं। तत्त्वं मूर्तगुणवृ
त्तिसंस्कारत्वान्यगुणत्वव्याप्यजातिशून्यगुणत्वं। शून्यान्तेन संख्यादिबुद्ध्यादिषु दोषः। रा॰म॰

…वेगस्थितिस्थापकोपग्रहाय संस्कारत्वान्येति वेगस्थितिस्थापकभावनासाधारणसंस्कारत्वजात्य
भाववत्तोयदिदं पमिदं। बुद्धिसुखदुःखेच्छाद्वेषप्रयत्नधर्माधर्मभावनाशब्दानां दशानाममूर्तगुण
त्वं। तत्र मूर्तगुणावृत्तिसंस्कारत्वान्यगुणत्वव्याप्यजातिशून्यगुणत्वं। शून्यान्तेन संख्यादिषु दो
षः। संख्यापरिमाणपृथक्त्वसंयोगविभागानामुभयगुणत्वं। तद्धि कालवृत्तित्वगुणत्वव्याप्यजाति
मत्त्वं। एवं दिग्वृत्तिवृत्तित्वादिकमपि बोध्यं। वृत्यन्तेन रूपत्वादिबुद्धित्वादिषु दोषः। संयोगविभागद्वि
त्वद्विपृथक्त्वादीनामनेकाश्रितत्वं। तच्च स्वाश्रयप्रतियोगिकान्योन्याभावसमानाधिकरणगुण
…नानैकत्वसमानाधिकरणगुणत्वं वा। रूपरसगंधस्पर्शैकत्वैकपृथक्त्वपरिमाणपरत्वापर
त्वगुरुत्वस्नेहसंस्कारबुद्धिसुखदुःखेच्छाद्वेषप्रयत्नधर्माधर्मशब्दानामेकैकाश्रितत्वं। तच्च
स्वाश्रयान्योन्याभावव्यापकात्यन्ताभावप्रतियोगिगुणत्वं। स्वाश्रयान्योन्याभावासमाना
करणगुणत्वं वा। रूपरसगंधस्पर्शस्नेहसांसिद्धिकद्रवत्वबुद्धिसुखदुःखेच्छाद्वेषप्रय

ष्ट । धर्माधर्मभावनाशब्दानां षोडशानां विशेषगुणत्वं तच्च मात्रगामित्व वायुवृत्तिवृत्तिस्पर्शान्यवृत्ति
समवाय्यन्यत्वे सति गुरुत्वजलद्रवत्वान्यगुणत्वं वायुवृत्तिस्पर्शवृत्तिसंख्यात्वादिसमवायिसंख्यादि
अनेककारणसमवेतं तः अत्र समवायिकारणानां स्पर्शसंग्रहाय चस्पर्शानुवृत्तीति। भावनासंग्रहाय मितं ते सम
विशेषगुणगुरुत्वनैमित्तिकद्रवत्ववेगान्यतमत्वं। संख्यापरिमाणपृथक्त्वसंयोगविभागप
रत्वापरत्वगुरुत्वनैमित्तिकद्रवत्वभावनान्यसंस्काराणां दशानां सामान्यगुणत्वं। भावनान्यसंस्का
रो वेगः स्थितिस्थापकश्च। तच्च निरुक्तविशेषगुणान्यगुणत्वं। शब्दस्पर्शरूपरसगंधानां बाह्यै
केन्द्रियग्राह्यत्वं। तच्च बहिरिन्द्रियाद्ग्राह्यबहिरिन्द्रियवृत्तिगुणत्वसाक्षाद्व्याप्यजातिमत्त्वं। प
ख्यादिमात्रग्राह्यवेगान्यशालिद्वित्वपरिमाणादि संस्कारद्वारा गुणायसाक्षादिति संख्यापरिमा
णपृथक्त्वसंयोगविभागपरत्वापरत्वस्नेहद्रवत्ववेगानां द्वीन्द्रियग्राह्यत्वं। तच्च चक्षुःस्पार्शन
निर्विकल्पकविषयगुणत्वव्याप्यजातिमत्त्वं। गुरुत्वधर्माधर्मवेगान्यसंस्काराणामतीन्द्रियत्वं राम०

। तच्च लौकिकप्रत्यक्षाविषयगुणत्वसाक्षाद्व्याप्यजातिमत्त्वं। शब्दज्ञानरूपादिजनकतावच्छेदकनिमि
त्तपवनाकाशसंयोगात्ममनोयोगजेतरपरमाणुसंयोगादिगतवैजात्यकारणपसाक्षाद्व्याप्येतितत्त्वं
वसंस्कारत्वान्यगुणत्वव्याप्यजात्यव्याप्यत्वे सति गुणवृत्तित्वं। भावनात्व स्थितिस्थापकत्वोपग्रहा
य संस्कारत्वान्येति। मिथ्याज्ञानवासनातन्मयतावच्छेदकादृष्टत्वसत्वेऽटादापधर्मत्वाधर्मत्वादाच तत्र
धर्माधर्मपोल्लक्षणासंगतिः। अपाकजरूपरसगंधस्पर्शपरिमाणैकत्वैकपृथक्त्वगुरुत्वं च द्रवत्वस्नेहभाव
नान्यसंस्काराणां कारणगुणपूर्वकत्वं। अपाकजरूपरसगंधस्पर्शपरिमाणैकत्वैकपृथक्त्वगु
रुत्वस्नेहे च द्रवत्वे ह भावनान्यसंस्काराणां कारणगुणपूर्वकत्वं। अपाकजरूपरसगंधस्पर्शपरिमाणैक
त्वैकपृथक्त्वगुरुत्व च द्रवत्वस्नेह भावनान्यसंस्काराणां कारणगुणपूर्वकत्वं। अपाकजत्वं पाकं विना
जाति। पाकानधीनजन्मवद्वित्तियावत्। तेन नित्यवर्गस्यापि सुरासं। वेगो नैककर्मजन्यो ग्राह्यगतत्वसा
समवायिभिन्नसमवेतात्ल्पमवायिकारणकान्यत्वे सति स्वाश्रयसमवायिसमवायिकारणकं।

घटाकाशसंयोगादित्वन्यघटाकाशसंयोगादेर्घटकपालैकत्वादित्वन्यघटकपालद्वित्वादेश्च
गुणापत्तेः। सत्यं तद्घटकखपदस्य प्रतियोगि परत्वात् बुद्ध्यादिवारणाय विशेष्यां बुद्धिसुखदु
खेच्छाद्वेषप्रयत्नधर्माधर्मभावनाशब्दानाम कारणगुणपूर्वकत्वं। तच्च विभुविशेषगुणा
त्वं। बुद्धिसुखदुःखेच्छाद्वेषप्रयत्नधर्माधर्मभावनाशब्दानामकारणगुणपूर्वकत्वं तच्च विभुवि
शेषगुणत्वं। बुद्धिसुखदुःखेच्छाद्वेषप्रयत्नधर्माधर्मभावनाशब्दत्वपरिमाणोत्तरसंयोग
नैमित्तिकद्रवत्वपरत्वापरत्वायाकत्वानां संयोगासमवायिकारणाकत्वं। भावनात्मात्ममनो
योगः। शब्दविभागौ न त्वेशब्दे मेघाकाशसंयोगः। न तूलपरिमाणे प्रचयः। उत्तरसंयोगे
तु संयोगस्त्ववयवसंयोगः। संयोगो द्विविधः कर्मजः संयोगजश्चेति विभागवाक्ये वरमपठितमा
हुत्तरं त्व। नैमित्तिकद्रवत्वे तेजःसंयोगः परत्वापरत्वयोर्दिक्कालपिंडसंयोगः। पाकजे रूपादौ राम०

तेजःसंयोगोऽसमवायिकारणं। लीलावतीकारस्तु अग्नीभावदशायां गुरुत्वापकर्षदर्शनात् न्यथानुप
पत्त्या गुरुत्वमपि पाकजं मेने। आचार्यास्तु। कारणगुणपूर्वकमेव गुरुत्वं ऽपाकजत्वविशेषरूपमप्रवे
शं संयोगगुरुत्वं पाकजं तेन मा विमृश्य तु। युक्तं चैतत् किंचिदवयवानां जलभागस्य च निर्गमनाद्वि अव
यविनि गुरुत्वापकर्षसंभवे परमाणावुत्कृष्टगुरुत्वनाशेऽ यत्कृष्टगुरुत्वस्य पाकजत्वस्वीकारे माना
भावात्। परिमाणस्य आमत्वं प्रचयादिति। परत्वापरत्वा द्वित्वद्विपृथक्त्वादीनां बुद्ध्यपेक्षत्वात् देशकाल
नां विप्रकृष्टत्वसंनिकृष्टत्वबुद्धिः परत्वापरत्वापरत्वयेः कद्वयादिधी द्वित्वादेरेकपृथक्त्वद्वयादि
द्रव्य धी पृथक्त्वादेर्निमित्तं। रूपरसगंधस्पर्शशब्दपरिमाणैकत्वैकपृथक्त्वस्नेहानां समानजातीयारंभकत्वं
कालि त्वयवगतरूपादेरवयविनि रूपादिकं मारभंते शब्दस्त्वाश्रपेशब्दं जनयति। सुखदुःखेच्छा
प्रयत्नास्तु से मानजातीयारंभकाः सुखमिच्छां दुःखं द्वेषातौ प्रयत्नं प्रयत्नश्चेष्टामिति। सुखदु
र्वि धर्मानमेवेच्छाद्वेषजनकमनागतसुखादेर्जनकत्वासंभवात्। तत्र ज्ञानस्य जनकत्वात्।द्वे

वि प्रवृत्तिविरोधे वा निवृत्तित्वमवृत्त्यभावरूपं वेति तु नव्यमुमुक्षुत्विरहशायां प्रयमितो निवृत्ता इति अ
वहारे निवृत्ताख्यः प्रयत्नसिद्धिर्वैवारत्वन्ये॥ संयोगविभागसंख्यागुरुत्वद्रवत्वोष्णस्पर्शज्ञानध
र्माधर्मसंस्काराणां समानासमानजात्यारंभकत्वं॥ संयोगात् विजातीयं द्रव्यादि विभागाच्छब्दः॥ सं
ख्यातः परिमाणं। गुरुत्वात्पतनं द्रवत्वात्स्यंदनं। उष्णस्पर्शात्पाकजा ज्ञानादिच्छादि धर्मात्सुखं।
दि अधर्माद्दुःखं। संस्कारात्क्रियास्मृती इति विजातीयवर्गः॥ सजातीयाः प्रसिद्धाः॥ अत्र जले ह्यंतं
प्रहरति सोऽपि लक्ष्यसृणाचार्याः॥ स्नेहस्य संग्रहे साक्षात्कारणत्वं॥ सक्तुजलयोरिव सत्कार
पि संग्रहो द्रव्यात किंतु परंपरया वा थं॥ तथा च जलसंयोगत्वेनैव कारणत्वमुचितं॥ अत्रस्तांवा
स्वाभाविकद्रवत्ववत्संयोगत्वेन तत्वे॥ एवं चाहुतहिमकरकासंयोगव्यवच्छेदः॥ विलक्षणातेजःसं
योग एव च पाकजहेतुर्नेतत्स्पर्शोपि तया संस्कारो भावनेतरश्च व्याप्यः॥ भावनायाः सजातीया
जनकत्वात्। ननु भावनायाः पटुतरभावनाजनकत्वं पटुतरत्ववदार्थापरनामको जातिविशेषो राम॰

ऽतीतस्मृतिरूपकार्ये प्रयोजकस्तत्र संस्कारद्वारा पूर्वस्मृतिर्द्वितीयास्मृतिः साक्षाद्वे हेतुः॥ नद्रु
तं। जायते हि पुनः पुनः स्मरणाद्दृढतरः संस्कार इति॥ अत्र स्मृतित्वेनैव हेतुत्वे स्वजन्यसंस्कारः
समवायश्च संबंधद्वये केनेत्युक्तं॥ आद्यस्मृत्या नाशक्षणे तादृशसंस्कारोत्पत्त्यापत्तेः॥ किंतु स्वज
न्यसंस्कारजन्यस्मृतिसंबंधेन स्मृतित्वेनैव हेतुत्वेत्यन्यान्नेदमपि सम्यक्। स्वस्वद्वितीयक्षणोत्पन्न
स्मृतिभ्यां दंडविशिष्टे चैत्रस्मृत्युत्पत्तेस्तत्र शीघ्रं च कुंडलविशिष्टे चैत्रानुभवजन्यस्मृतिसहितया
चैत्रांशे दृढसंस्काराणामनुत्पत्त्यापत्तेः। तस्मात्स्वप्रयोज्यस्मृतिसंबंधेन हेतुत्वाद्दंडविशिष्टे चैत्रस्मृति
जन्यसंस्कारस्यानंततः कालतयापि कुंडलविशिष्टस्मृतिहेतुत्वान्नानुपपत्तिरिति चेन्न। झटितिस्फुटो
द्बोधकप्रतिसंधानविषयांतरासंचारासंगत्येनैव झटितिस्मृत्युत्पत्तौ वैजात्यांतरे मानाभावादत्त
दृढतरसंस्कारादपि तत्स्यास्मृतिश्चिरं वा च॥ स्मरणोद्बोधकाधीनत्वाल्पचिंतासंस्कारिणी दृढसंस्का
रोगकालानां रूपस्य तत्राशुपस्थापसनुतादृशो यो शवहुचिं नेत्याप्याहुः। बुद्धिसुखदुः

१२

ः शब्देषु भावनाशब्दः स्वाश्रयसमवेतविशेषगुणारंभकाः। बुद्धिरिच्छादिफलं। सुखदुःखेच्छाद्वेषावि
भावः। इच्छा इच्छादिकं। द्वेषो द्वेषादिकं। भावना स्मृत्यादिकं। शब्दमिति। रूपरसगंधस्पर्शपरिमाण
स्नेहप्रयत्नाः परत्रारंभकाः। अवयवरूपादयः स्नेहांता अवयविनि रूपादिकमारभंते प्रयत्नश्चा
त्मनिष्ठः शरीरे चेष्टां। संयोगो द्रव्यं स्वाश्रये।। भेरीदंडविभागसंयोगैकपृथक्त्वगुरुत्वद्रवत्ववेगस्ने
हप्रयत्नधर्माधर्मास्तूभयत्रारंभकाः। संयोगो द्रव्यं स्वाश्रये।। भेरीदंडादिसंयोगो नभसि श
ब्दं।। वंशदलयोर्विभागो विभागं स्वाश्रये शब्दमन्यत्र। संख्या स्वाश्रये द्वित्वादिकं। अवयवगता
ऽवयविनि संख्यां परिमाणं च। एकपृथक्त्वं स्वाश्रये द्विपृथक्त्वादि। अवयवैकपृथक्त्वमेवाव
यविपृथक्त्वादीनामकारणत्वमिति पाठनाय। गुरुत्वं स्वाश्रये पतनमन्यत्र गुरुत्वं स्वाश्रये सं
नपत्नत्र गुरुत्वमेव द्रवत्वं द्रवत्वमेवा वेगः स्वाश्रये गमनमन्यत्रावयवगतोऽवयविनि वेगं धर्म
ः स्वाश्रये सुखमन्यत्र त्वलनादौ क्रियां। अधर्मः स्वाश्रये दुःखमन्यत्र पवनादौ क्रियां। स्ने एम०

हः स्वाश्रये संग्रहमन्यत्रावयवगतोऽवयविनि स्नेहमेव। प्रयत्नो विहितनिषिद्धरूपः स्वाश्रये ध
र्माधर्मौ शरीरे चेष्टामिति। गुरुत्वद्रवत्ववेगस्थितिस्थापकप्रयत्नधर्माधर्मसंयोगविशेषाः क्रियाहे
तवः। गुरुत्वात्पतनं। द्रवत्वात्स्यंदनं। वेगाद्गमनं। प्रयत्नाच्चेष्टा। धर्माधर्माभ्यामूर्कंथादि। संयोगवि
शेषान्नोदनाभिघातलक्षणात् क्रियादिकमेरस्थितिस्थापकात्र मनोत्रमनमिति। रूपरसगंधानु
ष्णस्पर्शसंख्यापरिमाणैकपृथक्त्वस्नेहशब्दानामसमवायित्वं। अवयवरूपादिकमवयविरूपादे
रसमवायिकारणं। शब्दः शब्दस्याभिघातादिसंख्यापरिमाणस्य। अत्रासमवायित्वमिति साधारणांति
मित्तकारणत्वे सत्यसमवायिकारणत्वं लक्षणं। तेनास्मस्पर्शादिव्युदासः नन्वेवमंत्यावय
विरूपादावव्याप्तिः तेषामसमवायिकारणत्वाभावात्।। किंच रूपादीनां धर्मिमत्त्वेऽपि ज्ञेयत्वेन
क्षयोश्च निमित्तत्वादव्याप्तिः। न चात्रमानाभावः। अवयवरूपादयः पादिस्कंते। आरूपादौ वै
णत्वेसमवच्चपलक्षणत्वायोगात्। एवं रसस्त्रीवनपुष्टिवलारोग्यनिमित्तत्वादव्याप्तिः।

ते शास्य श्रवेयसापेक्षेव क्रियाऽभिघातहेतुरितिस्य शेष्याभिघातेस्नेहस्य च संग्रहेति भिन्नत्वाद्व्या
प्ति व्याप्तिश्च कपालाकाशसंयोगादिविनिपेचात्त्वान्नमेतन्नवीनेवेदृशादिमित्रेकाश्चित्।
न कारणावृत्त्यसमवायिकारणवृत्तिप्रत्यक्षत्वाप्यप्रत्यक्षजातिमद्गुणत्वस्य विवक्षितत्वात्। अवृत्तं
संयोगविभागवेगादिनिरासः। संयोगविभागयोः शब्दवृत्तिभिन्नत्वात्। वेगस्याभिघातजक्रिया
भिन्नत्वात्। गुरुत्वस्य वेगस्याप्युत्कर्षेणाभिघातजक्रियोत्कर्षात्। नौकागमनविशेषो द्रवद्रव्ये र
पतेरिति द्रवत्वस्य नौकागमननिमित्तत्वात्राति व्याप्तिः। परिचककठिनद्रव्यसंयोगस्येव नौकागमन
शिथिलत्वमेव एवं सत्यपि द्रवद्रव्यसंयोगेऽपाषाणादिप्रतिबंधात्तगमननिमित्तच्यतेत्ता हाद्रवत्वान्येति
विशेषणान्तरं नाति व्याप्तिः। वृत्तमेतेन परत्वादिनिरासः। द्विपृथक्त्वादिवारणाय पृथक्त्वान्येतिजा
तिविशेषणमेकपृथक्त्वे तु तत्त्वमात्रपलक्षणसंगतिः। उष्णस्पर्शस्य पाकजनिमित्तत्वाद्रूप
णोप्यत्र। द्वितीयस्पर्शस्य स्थितिस्थापकस्य च वारणाय प्रसक्तेति। उष्णत्वव्याप्यमनुद्भूतत्वं स्थिर राम०

स्थापकत्वं च नमसृत्यमिति न दोषः। कर्मवारणाय गुणत्वं। अत्र यत्किंचिदसमवायिकारणे कार्य
प्रत्यासत्त्योः कारणत्वं। न कार्यैकार्थप्रत्यासत्त्याकारणत्वं। तंतुरूपादेः पटरूपादेः स्तदभावात्। नाविकारणैका
र्थप्रत्यासत्यातत्त्वं। शब्दे शब्दवृत्त्यस्तत्संभवात्। नापि कार्यैकारणान्यतरैकार्थप्रत्यासत्त्यात्वं संयोगादे
र्विभागादिकं प्रति तंतुरांसंयोगादेश्च पटादिकं प्रत्यसमवायिकारणत्वापत्तेः। न च संयोगादिकमपि
किं विलक्षणसमवायि कारणं भवत्येव। कार्यविशेषासमवायिकारणलक्षणे तु तत्तत्कारणान्यत्वमपि
निवेश्यमिति वाच्यं। निमित्तपवनाकाशसंयोगमनोगगनसंयोगादेः कार्यमात्रासमवायिकारण
भिन्नस्य शब्दविभागादेः कार्यसमवायप्रत्यासत्त्याहेतोरसमवायिकारणत्वापत्तेः। किंच ज्ञानादेरिच्छा
घसमवायिकारणत्वं स्यादिति चेत् अत्रात्मविशेषगुणान्यत्वे सति कार्यैकारणान्यतरैकार्थप्रत्या
सत्त्याकारणत्वमस्तत्त्वात्। कारणं समवायितेन पाकजादिकारणतेजःसंयोगादेकार्यसमवेतर
सोष्णस्पर्शादेर्नपाकजादिकं प्रत्यसमवायित्वं पाचका पेसताद्दशप्रत्यासक्कारणोपजपन्नाम

कु०मा० १४

समवायिकारणीयं यत्र तन्नासमवायिकारणत्वव्यवहारस्तत्कार्ये प्रतियोगिकतत्तद्वृत्तित्वविशेषे नोक्तं कारण
णत्वविशेषणात्तत्संयोगादावतिव्याप्तिः। विभागप्रतियोगिकसंयोगवृत्तिभिन्नत्वपटादिप्रतियोगिककर्तुरीसं
योगादिवृत्तिभिन्नत्वादिना विशेषणात्तपसादिप्रवेशादननुगमः न च सामान्यतोऽसमवायिकारणत्वनि
मित्तपवनसंयोगादिभिन्नत्वं विभागाद्यसमवायिकारणत्वे च संयोगादिभिन्नत्वं निवेश्यमिति वाच्यं कार
णताविशेषगुरुस्कन्धैवासमवायिकारणत्वव्यवहारोपनिरूपककारणतानपस्यासमवायिकार
णतालक्षणत्वापत्तेः उक्तप्रकारस्याप्रयोजकत्वात्। आत्मविशेषगुणानां तु न किंचित्कार्यं प्रत्यसमवायि
कारणत्वमतस्तस्यत्वमेवोक्तं। यत्त्वात्मविशेषगुणान्यत्वसहितादेः शब्दस्यासन्निगर्भकारणता
तामात्रव्याप्यजातिसमानाधिकरणधर्मसमवायित्वं तादृशकारणत्वाभावव्याप्यं च परत्वत्वाप
रत्वद्वित्वपृथक्त्वादिकं तत्समानाधिकरणं रूपैत्वैकपृथक्त्वत्वादिकं तत्समवायित्वं रूपादेः। म
संयोगत्वेन संयोगादेः पक्षसामान्यतोऽभवत्येवासमवायिकारणता निविशेषेतु पूर्वोक्तेव गतिरि राम०

तत्त्वानिमित्तपवनसंयोगादिवद्गुरुत्वपरममहत्त्वयोरपि सामान्यतस्तद्व्यवहारभाजनयोरव्या
प्तेः। असमवायिकारणत्वव्यवहारस्य कारणताविशेषगुरुस्कारणनिर्वाहोक्तेरित्यादिका। बुद्धिसुखदुः
खेच्छाद्वेषप्रयत्नधर्माधर्मभावनानां निमित्तत्वं। संयोगविभागोष्णस्पर्शगुरुत्वद्रवत्ववेगानामुभ
यथाकारणत्वं। परत्वापरत्वद्वित्वपृथक्त्वादीनां मकारणत्वं। संयोगविभागशब्दात्मविशेषगुणानां प्रदे
शवृत्तित्वं। ननु संयोगादेः प्रदेशवृत्तित्वमयुक्तं। अस्य तत्ताभाववत्त्वावच्छेदेन प्रतियोगिना विरोधकल्प
नादिति चेत्। मूले वृक्षे चैत्रेन कपिसंयोग इत्यादिबाधितप्रतीतौ मूलावच्छेदेन तदत्यन्ताभावसि
द्धेर्विरोधासिद्धेः। घटादावत्यन्ताभावस्य पटादिना विरोधाभावेन स्वस्वप्रतियोगिसामानाधि
करण्यविरोधस्य विशेषविश्रान्ततया संयोगाद्यत्यन्ताभावे तदकल्पनात्। न चायाद्यवच्छिन्नः कपि
संयोगादिवृत्तित्वस्याग्राद्यवच्छिन्नतत्तद्भूमिककपिसंयोगादिनिरूपितत्वावच्छिन्नप्रतिबध्यज्ञाने विष
यत्वस्य च कपिसंसंयोगाद्यत्यन्ताभावविकल्पनामपि अवच्छिन्नत्वं तमपहाय तद्रूपकल्पने वद्गीप्र

सीतिवाच्यं प्रमाणिकत्वेन तत्र थैवकल्पनाद्रूत्यथाविशेषाकल्पनस्य लाघवात् भावकल्पनेनैव तेन नैया
ना। किंच एकावच्छेदेन प्रतिबध्यप्रतिबंधकभावस्यापि क्लृप्तत्वादियथैः क्लृप्तत्वात् तत्कल्पनेने गौर
वं [illegible] तावव्याप्यवृत्तित्वभ्रमसंभवात्। द्वितीयप्रतीतेः प्रमापि तत्र याना नैवं कपिसंयोगिभेदोऽप्य
[illegible] वृत्तेः स्यादिति वाच्यं। मूले वृक्षो न कपिसंयोगीति प्रतीतेर्नियतोपस्थितिक कपिसंयोगत्वाव
च्छिन्नात्यन्ताभावविषयत्वे यैवोपपत्तेर्भेदाव्याप्यवृत्तित्वाकल्पनादिति मंचः॥ न व्यासक्तकपिसं
योगाद्विभेदोऽप्यव्याप्यवृत्तिः न कपिसंयोगीति भेदत्वप्रकारिकायाः प्रत्यक्षप्रतीतेः। शाखप्र
तीतेश्च अत्यन्ताभावत्वप्रकारकस्य च तु न शक्यत्वात्। सह स्वरूपाविवाधको रिटंर [illegible] मितिप्रती
[illegible] ंगत्वप्रकारकत्वस्य समर्थयितुमशक्यत्वात्। ननु योगिनिसत्वमीविना शाखप्रतीतेर्पा
तिरिक्तनामार्थात्यन्ताभावत्वप्रकारकत्वायोगाद्व। अन्यथा घटो न घट इत्यादिवाक्यस्यापि
[illegible] ता यत्नेः न च वृक्षो न कपिसंयोगवानित्यत्रमनुपपत्तमसिध्याद्रूतन नञर्थमनुपपन्नस्य योग्यता न प राम०

[illegible] न फलं तं भक्ष्यं परित्यज्य विवमत्तुवाद्विप्रकृतस्य व्यतिरिक्तनामार्थात्यन्ताभावबोधस्य च नानुयोगि
मत्यप्यपेक्षेति वाच्यं। तादृशाकल्पनायां गौरवात् पाकतादृशायामयं रक्तो न श्याम इत्यादौ श्यामत्वा
दितरविशेषणसामानाधिकरण्येनान्वयासंभवाच्च। युक्तं चैतद्भेदाव्याप्यवृत्तित्वं। कपिसंयोगाद्यत्यन्ताभावस्ये
व कपिसंयोग्याद्विभेदत्वे लाघवात्। न चैवं कपिसंयोगो न कपिसंयोगवद्वृक्षपि वाक्यं योग्यं स्यात्। क
पिसंयोगात्यन्ताभावस्य भेदरूपस्य कपिसंयोगे सत्त्वादिति वाच्यं। अनुयोगिप्रतियोगिवाचकपद
योः समानविभक्तिकत्वेनाऽनन्यसंबंधावच्छिन्नप्रतियोगिताकत्वस्य संसर्गत्वात्। कपिसंयोग
[illegible] शिष्टस्य कपिसंयोगेऽसत्त्वान्नेत्याहुः। श्यामाद्यक्तो विधर्मी न तु पर्ययगिति प्रतीतेः पृथ
क् [illegible] भावरूपं व्याप्यवृत्तिसिद्धान्तीत्येके। एतावता पृथक्त्वत्वावच्छिन्नावच्छिन्नान्योन्या
भावरूपतालक्ष्म। श्यामादावच्छिन्नान्योन्याभावाव्याप्यवृत्तित्वं तु दुर्वारमित्यन्ये। रूपरसगंधस्पर्श
संख्यापरिमाणपृथक्त्वगुरुत्वद्रवत्वस्नेहवेगस्थितिस्थापकत्वापरत्वानामंशप

व्यापित्वं स्वप्रयाकं न रूपरसगंधस्पर्शपरिमाणैकत्वैकपृथक्त्वद्रवत्वस्नेहानां यावद्द्रव्यभावित्वं शेषाणाम
यावद्द्रव्यभावित्वं सांसिद्धिकद्रवत्वरूपरसगंधस्पर्शस्नेहानां मूर्त्तविशेषगुणत्वं रूपरसगंधस्नेहगुरुत्व
तिस्थापकानां स्पर्शव्याप्यत्वं स्नेहशैत्यसांसिद्धिकद्रवत्वानां जलमात्रवृत्तित्वं २७ अभास्व
रतेजोमात्रवृत्तित्वं गंधमाधुर्येतररसस्पर्शेतररूपाणां पृथिवीमात्रवृत्तित्वं बुद्ध्यादिभावना
न्तानामविशेषगुणत्वं। बुद्धीच्छाद्वेषप्रयत्नभावनानामेव सविषयकत्वं। इच्छादीनां जनकज्ञान
पत्वेनैव विषयत्वव्यवहार इति तु प्रांचः। कापि कारणाभावावच्छेदकत्वेन व्यवहारस्थले सच्चज्ञान
इच्छादेरपि साक्षाद्विषयतेति नव्याः नव्यमते भावनायामपि स्वविषयकत्वमेकपुक्तं। तत्र द्वेषे
कतन्नप्रकारकस्मृतिं प्रति तत्र द्वेषप्रयुक्ततन्नप्रकारकलिङ्गस्य यस्य स्वजन्यभावनासंबंधेन हे
नातिप्रसंगः। यत्तु स्वंसजातीयघटांशे उपेक्षात्मकानुभूतलं घटवत्पटवद्येति निश्चयात् घटांशे
प्रसंगः स्वजन्यभावनायाश्चापपंशे स्मृत्यनुत्पादेन स्वीकारात्। न चोपेक्षान्यत्वस्य राम०

...पि ...घ्यंगादृत्यं चद्धितीयादिकर्मणः ... वेगस्य स्वाद्ये कर्माद्दृष्टस्युषपारे ... नासा
...क्षादियुक्तकर्मणोदिकर... स्मादेव वेगादुत्तरकर्मसंतानः ... इत्यालम्ब... संयोगविरोधीति भावे
चरमसंयोगोपलक्षकस्पर्शवत्वद्रव्यमपि युक्तं इतिमिते ... वेगस्य प्रव... उत्सारणक्रियायाः सत्तान रूपफ
लतादृशस्य कारणानात्यात् क्रियायाश्च विप्रकर्षोनुसारेणाक्रियायास्तत्तोन रूपफलस्य संयोगस्त्रिभा
गादिरूपलस्यैवद्यातुल्यं स्थिति किं वेगाख्यगुणेन। यदि च वेगतारतम्यप्रत्ययपाद्यागवेग ... स्वः
स्वजन्यकर्मणा वेगपक्षः स्वजन्यकर्मणो वेगनाशकत्वात्तद्धितीयवेगानुपपत्तिस्तदाह वेगः
सिद्धतीत्यन्ये वेगस्य क्रियायात्तवाशक... जनकत्वयोग्यकल्पनातः मह... क्रियायाश्च ...
क्रियाहेतुत्वमेव युक्तमित्यपरा। स्थितिस्थापके चमानाभावः। अवयवानां परस्परसंयोग...
गवशादेव स्थानी... नेतृत्वस्थानावच्छिन्नसंस्कारस्तत्स्थानसंयोगानुकूलक्रियाजनक इ
ति निमम संभवति तत्र मनसः शावस्थसंस्थाहकसंयोगस्याश्च ... प्राक्तनतत्स्था

न स्यात्सामान्यं तेरितिरिक्त॥ तथा च क्षितित्वविशिष्टगंधः रूपमनेकप्रकारं शुक्लादि रसः षड्विधो मधुरादिः स्प
र्शो स्पर्शस्त्वनुष्णाशीतत्वे सति पाकजः। अनुष्णाशीतत्वे जातिविशेषः पृथिवीवायुस्पर्शसाधारण इति भावः।
यत्तु पृथिव्यां स्पर्शो नास्ति उष्णशीतेतरस्पर्शो न भवतीति तन्न तादृशस्पर्श कठिनादिस्पर्शे सानुभवात्
तथा स्पर्शत्वव्याप्यत्वे सत्युपाधिकः जातिविशेषो माना भावः उष्णशीतेतरस्पर्शत्वेनैव कठिनत्वव्यवहारादित्यके।
नेतन्नतुक्तं उक्त उष्णशीतान्यतरसंबंधाभ्यनुष्णाशीतत्वावच्छिन्नप्रत्यक्षापादकत्वस्य परे। उभयथाप्यनुष्णाशीत
स्पर्शवत्त्वं वायोरपीति पाकजत्वेति तत्फलितं या च पाकजत्वमप्यनुष्णाशीतत्वव्याप्यजातिमत्स्पर्शवत्त्वे लक्ष
णं॥ न च पृथिव्यां रूपादिकमस्तु पाकजं शुक्लनीलादिस्फुटविशेषात् स्पर्शस्तु न तथेति वा
च्यं॥ कठिनादिद्रव्ये पाकेन सुकुमारादिस्पर्शोदर्शनात्॥ दृश्यते हि कार्यस्य घटारंभककपालानाम
स्याघटारंभकत्वं स्पर्शविशेषसहकारात्॥ एतेन पार्थिवपरमाणोरगंधकार्ये द्रव्य रूपा
दिजातीयरूपादिकं नित्यं पाकाच्च घटादौ अग्राह्यत्वाच्च यदि विपर्यये तेपूर्वरूपादिनाशोपररूपहेतुपा। रा म०

का ऽवयवरूपादिकं पाकोदेवनाय तेरतपास्त। परमाणौ रूपादिविशेषानावृतरूपादु गत्वा पाकसत्तिमिपमा
नुपपत्तेः। द्व्यणुकादेः क्रमेणोत्पत्त्यापुगपत्वाके नत्रत्र रूपोत्पत्तेरसंभवाच्च। किं चाणुरूपमपर
मारवारघिपुञ्जाणुके रूपमेव व्यणुकादावेव स्फुटमिति फलितोऽथ किं चित्तद्व्यणुकावच्छेदेन पुनः रूपमते न
कतेनः संयोगात् व्यणुके चित्रं तापतेन चापि रूपममेव स्यादिति न किंचिदेतत्। आचार्यास्तु स्पर्शस्याकृत
त्वे संख्यापरिमाणादिवद् विशेषप्रसंगः तथा हि वृश्चिकदंशे भूकंपंविन वृश्चिकपत्रिकादिस्पर्शे चद्
गदविशेषात् स्मात्रस्यानुमशितांदोषधिस्पर्शे तदुपशमः गवादिचांडालादिस्पर्शे विधिनिषेधौ च न
स्यातां न च तद्व्यमात्रेतोदर्शन स्पर्शेन घ्राणरचादनभेदेनमानं गमादिगादिषु पावश्रितभेदाभावा
पत्तेरित्याहुः। तत्र॥ तत्स्पर्शविशेषग्रहस्य तत्कार्यहेतुत्वे सुषुप्त्यादौ तत्र स्यात्। तत्र स्पर्शवत्संयो
गस्यैव तत्त्वं॥ स्पर्शविशेषस्तु बाधितो योग्यव्यक्ता ते योग्यत्वानिश्चयादेतेन संयोगमात्रस्य तत्त्वे घ्रा
णोऽपि स्पर्शप्रायश्चित्तं स्यादित्यपास्तं स्पर्शविशेषसाक्षात्कारस्याधर्मविशेषहेतुत्वे संपूर्णस्याव धर्म

विशेषस्यानुत्पादप्रसंगात् स्पर्शे विशेषस्य बाधितत्वेन संयोगविशेषस्यैव बाधप्रविशेषहेतुत्वस्य त्वयापि।
स्वीकर्तव्यत्वात्तस्य तत्त्वे तत्तत्संयोगातिरिक्तेति चेन्न चेतावता गंधवद्वृत्तिद्रव्यत्वव्याप्यजातिमत्त्वं मूलोक्तरूपस
मानाधिकरणद्रव्यत्वव्याप्यजातिमत्त्वं भिन्नादिलक्षणं मात्त्यं। नैचैतद्युक्तं। सुगंधिसलिलं सुरभिः समीरणः
कालिंदीजलं नीलमित्यादिप्रतीत्या जलादावपि गंधादिसिद्धिरिति चेत्त्वासलिलादेर्गंधादिमत्त्वस्योपाध्य
व्यतिरेकप्रयुक्तान्वयव्यतिरेकप्रतियोगित्वेनौपाधिकत्वात्।। प्रतीयते हि चंदनसंयुक्ते जले चंदनगंधः। कुं
कुमसंयुक्ते कुंकुमगंध इत्यादि। किंचोक्तयुक्त्या गंधत्वावच्छिन्ने पृथिवीत्वादिनोऽहेतुत्वात्तज्जलादौ तत्संभव
ः। न चास्तु नलत्वादिनैव गंधादिहेतुत्वं।। अननुभूयमानजलादिसंबंधके पार्थिवे गंधादिप्रत्ययात्।। अ
न्यादृशगंधस्यैवसत्त्वेन। पाकजान्यादृशगंधवत्त्वात्तुल्ये पाकजगंधानुपपत्तेश्च। एतेन नीलरूपमपि
व्याख्यातं। विपत्तिविषविसंकालिंदीजलेपि शुक्लत्वप्रतीतेर्वविर्कविनाय यायत्वा तु न्य स्वच्छस्यक्तत्वा
वच्छेदेन तल जन्यत्वकल्पनाद्य।। एकदेशिनस्तु।। रसगुरुत्वसमवायिकारणतावच्छेदकजातिपवगंधस राम०

मवांपि हेतुत्वं। पृथिवीमात्रवृत्तित्वात्तेनानुमानाभावः। जलं पाकाद्रूपरसविशेषोत्पत्तिवैलक्षण्यात् तद्भिन्नं।। उक्त
युक्त्या जले गंधस्यौपाधिकत्वसिद्धेः पृथग्गंधवत्त्वादिकमेव लक्षणमिति तत्त्वं। मणयोर्गंधाद्यभावेनाव्याप्तेः।
न च मणेः पारंभकाल्लीनावस्थारंभकस्यैव समाराणावेगंधवत्वेन पाकजरूपवत्त्वादित्यनुमानात्तेषु गंधसिद्धौ घ्राणाका
धेत्यावयविष्वपि गंधतद्गंधसिद्धिः। जलादिकं गंधवत् रूपवत्त्वादित्यनुमानाज्जलादावपि तत्सिद्ध्यापत्तेः। अ
प्रयोजकत्वात्तत्र क्षितित्वसिद्धिरिति चेत्तुल्यं। न च पाकजरूपगंधयोरेकसामग्रीकत्वान्नाप्रयोजकत्वमिति वाच्यं
। रूपपराद्वृत्तावपि गंधस्यापराद्वृत्तेर्नीलपीतादिसुरभ्यसुरभ्यादिनियमानुपपत्तेश्च। अविजातीयविजातीय
तेजःसंयोगत्वेनैव रूपविशेषविशेषहेतुत्वे न सामग्र्यभिन्नत्वं। दृश्यं च पाकविशेषात्प्रगंधे रणाभिभिरणमा
त्रिगंधताभरणादिगंधवम्निरारंभात्तदृश्यमनोगंधवत्त्वमिति नानुमानतो गंधसिद्धिः। एतेन घ्राणागंधवत्त्वेन पृ
थिवीत्वादित्यादिकमप्यपास्तं।। आकाशं रूपवत् द्रव्यत्वादित्यादेः सकाशादावप्यनुभूतरूपापत्तेः। प
तुरसतादौ पाषाणपत्तलारंभप्रयोजकपरमाण्वारंभरूपादिकमावश्यकं न हि तत्रापि परमाणौ पाकेन रू

विपरमाणौ पाकेन पादितं सुसंभवतीति तत्र रसनानादात्वभूतत्वादिप्रसंगात् । अदृष्टविशेषो रसनादिभे
दस्तत्तत्समवायिकारणमेव वा भूतरूपादिप्रयोजकमिति चेत्तर्हि रूपादिप्रयोजकमेवास्तु ।। यत्तु तन्त्वस्वच्छ
त्वावच्छिन्नं प्रति स्वकृत्वेन हेतुत्वात्रोद्भूतत्वं तत्पत्तावच्छेदकं नाप्यनुद्भूतत्वं द्रव्यचाक्षुषप्रतिवंधकतावच्छेद
कतया सिद्धस्तत्स्वपरमाणुरूपनिष्ठतया नित्यवृत्तित्वासुभूततत्त्वमेतत्स्वकूटरूपनपाठ्यतावच्छेदकत्वे
मादित्यं च द्रव्यचाक्षुषे महत्त्वहेतुत्वेनापि सात्वचमितितन्त्रा महत्त्वरूपयोश्चाक्षुषहेतुत्वेनोपपन्नावन्नंग
नुभूतरूपतत्त्वाति वंधकत्वकल्पनायामन्याप्यत्वात् ।। तन्तुस्वकृत्त्वमनुत्पन्नानुभूततत्त्वस्वतन्त्र्यतावच्छेदक
त्वावश्यकत्वाच्च रसनाधारं भकाः परमाणावो भिन्ना एवेत्यप्याहुः । वस्तुतस्तु जलादिपरमाणावः
सरूपनीरूपभेदेन द्वेधा । तथा च रसनादिद्व्यणुकं नीरूपमात्रारब्धं योग्यजलादिद्व्यणुकं तु नीरूपसरू
पाभ्यामित्यमित्यनियततारम्भः स्वरूपसरूपादेरनारंभकत्वेनयोक्तिकं अस्तु वा योग्यजलादिद्व्यणुकं
सरूपद्व्यणुकद्वयनीरूपैकद्व्यणुकारब्धमित्यदोषः । वायो रूपं नास्तीति लौकिकप्रतीतिरप्यनुभूत रामo

रूपासत्त्वसाधिका ।। तत्सत्त्वे योग्यत्वानुपलब्धमाविनत्तल्लौकिकप्रत्यक्षायोगादिति दिक् । एवं शुक्लतरशुक्लतमा
दिसमानाधिकरणा द्रव्याव्याप्यजातिमत्त्वमपि पृथिव्यामेवाजलतेजसोः शुक्लेष्ववान्तरतारतम्याभावात् । पार्थि
वद्रव्यसंसर्गेणैव तथाप्रतीभासादेवमवांतरेतेकसामान्यविशेषवान् रसः पृथिव्यामेवाजलस्यतु स्वभाव
तो व्यक्त मधुर एव रसः नारिकेलादिजलरसगताविशेषास्तु संसर्गिपार्थिवोपाधिकाः तत्यावायोः । सा च
पृथिवी द्विविधा नित्याऽनित्या च । पनित्या परमाणुलक्षणा कार्यलक्षणात्वानित्याऽत्रा । अथ परमा
णौ मानाभावः न च स्थूलद्रव्यस्य लोष्टादेर्भज्यमानस्याल्पतरत्वमादिमत्वात्पतोनाल्पीयः स परमाणु
रितियोग्यवलात्परममहत्त्वस्तिनिवत्परमाणौ सिद्धमितिवाच्यं तन्नित्यत्वेऽतीन्द्रियत्वे च मानाभावस्य शा
क्तित्वादिति चेन्न निखिलद्रव्यावयवानामावयवत्वेऽनवस्थापत्तेः । प्रलयेनान्तरावच्छेदेनासंभवा
त् ।। मेरुसर्षपादीनामनंतावयवकत्वाविशेषात्परिमाणतारतम्यानुपपत्तेश्च । न च मध्यपादिद्विशेषत्त
लपिंडे मेरोश्चनरविभेदाप्रसंगात्वस्यात् ।। जलपिंडे मच यस्माधिसत्त्वादिति कस्यचित्रिरवयवत्वे वाद्यं निरव

मवस्य चद्रव्यस्याकार्यत्वे न नित्यत्वं। प्रतीतिरिपत्त्वमहत्त्व स्रूमत्वात्कृत्स्नत्वं यावपववहुत्वाद्यपपत्तानुं न च त
दस्तु निम्समसंतापकृषं स्वत्पेत्तोत्कृष्ट विमुगहत्त्ववदिति वाच्यं स्वपकृष्टमहत्त्वावच्छेदेनैवावयवबहुत्वज
न्यत्वात् किंच प्रभाधारंभकस्य नित्यस्य महत्त्वे तमसि स्वपरप्रकाशकत्वापत्तिर्लाघवेन महद्द्रव्यत्वेन भि
भृतहपवत्त्वेन तेजस्त्ववत्त्वादिति दिक्। नन्वेवमनवस्थानित्य: परमाणु: द्व्यणुकेतु मानाभावइति चे
त्। त्र्यणुकस्य लौकिकमत्यक्षविषयद्रव्यस्य महत्त्वं वाच्यं।। तच्च महत्त्वमवच्चपाद्यन्यमवयवबहुत्वं स
स्यात्तन्न मिमिभिन्नि परमाणुद्वयेसमवेतं न त्र्यणुकं किंतु घणुकंतदारंभं त्र्यणुकमिति सिद्धं न च परमाणो
र्महत्त्वाभावेनिम्नचयः संभवतीति तत्र न्यमन्यस्यत्ततन्महत्त्वं किंचिदवयवावच्छेदेनासंयोगित्वे सति किं
चिदवयवावच्छेदेन संयोगित्वलक्षणप्रचयस्य निरवयवे परमाणावयोगात्।। तद्रूपप्रयोगः त्र्यणु
कावयवाः सावयवा महदारंभकत्वात्। कपालवत्। कपालावयवाः निरवयवाः सावयवत्वे मानाभावादिति
। न चैते सावयवास्पर्शवत्त्वादिति सत्प्रतिपक्षः अनवस्थालक्षणप्रतिकूलतर्कपराहतत्वात्तन राम०

चत्रिभिः परमाणुभिरेव त्र्यणुकमारभ्यतामलं द्व्यणुकेनेति वाच्यं। तथापि परमाणुद्वयारब्धस्य द्व्यणुकत्वानपा
पात्। पत्युरंदमेत मयुक्तं त्र्यणुकोत्पत्तिकाले द्व्यणुकोत्पत्त्यापत्तेः तस्माद्व्यणुकं प्रतिपरमाणुत्वेन त्र्यणुकं प्रति द्व्य
णुकत्वेन समवायिकारणत्वं वाच्यं। न च परमाणुत्वपादावपि द्व्यणुकापत्तिरदृष्टविशेषस्य प्रयोजकस्यातीन्द्रिय
स्य विजातीयसंयोगस्य युगपत्त्रिषु परमाणुष्वस्वीकारादिति तत्र द्व्यणुकत्वस्य कार्यतानवच्छेदकत्वेन त्र्य
णुकोत्पत्तिकाले तद्यापत्त्यनापातात्। त्र्यणुत्वानुत्पत्तिस्तु महत्परिमाणसामग्र्या प्रतिबंधात्। द्वित्वस्य व्या
प्यत्वसंबंधेन त्र्यणुत्वेहेतुत्वात्। तत्तद्व्यणुकात्मकसमवायिविरहात् इति। अथैवं कपालत्वतंतुत्वादिना
घटपटादिहेतुत्वे मानाभावः। युक्तं चैतत्। क्वचित् द्वितंतुकपटादेरपि तंत्वंतरसंयोगे पटोत्पादकत्वा
त्। एकैकतंतुसंयोगे द्वितंतुसंयोगे द्वितंतुकादेर्नाशे त्रितंतुकादेर्नाशे त्रितंतुकाद्युत्पत्तिः पुनरेकैकतंतुवि
योगे त्रितंतुकस्य नाशे द्वितंतुकाद्युत्पत्तिरिति कल्पनाया गौरवग्रासादिति चेन्न। द्वितंतुकादावनन्यथा
सिद्धत्वे व्यतिरेकानुविधानात्। त्रयाणां हेतुत्वे सिद्धे त्रितंतुकपटादेरपि तंतावेवोत्पत्तिः। युगपत्तंतुत्रया

प॰मा॰ दिसंयोगेत्रितंतुकोद्रपि तत्रैवोत्पत्तेर्वाच्यत्वात्तद्द्वितंतुकादिक्रमेणोत्पन्नचतुरादितंतुकपटस्य द्वितंतुका
समवायिकारणसंयोगनाशात्तद्द्वितंतुकादिनाशक्रमेण नाशे तत्पुनर्द्वितंतुकादिक्रमेणोत्पत्तिरिति तन्न
वापि कल्पनागौरवसाम्येतंतौ अपि पटइति प्रतीतेर्भ्रमत्वायोगाच्च नहि पटे पटइति कश्चित्सत्वेति । अतएव
वंतत्वाकाशादिसंयोगत्वेन पटाकारादिविजातीयसंयोगत्वेन तत्वादिकार्यकारणभावोपि सूपपदः न प
टादिजनकविजातीयसंयोगप्रतितंतुत्वादिनाहेतुत्वात्तत्वावार्द्धवपटाद्युत्पत्तिरित्यप्याहुः । एतेन तंतुम
तरारब्धद्वितंतुकपटे नवतंतत्वंतरसंयोगेत्रितंतुकोत्पत्तिः एवं च तुस्तंतुकोद्रपीत्यारापारंभकवादएव
युक्त इत्यप्यपास्तं ॥ न चैवमपि द्वितंतुकपटादिमतोरवंतत्वाद्यासंत्वतंत्रादियोगात्त्रितंतुकपटाद्यु
त्पत्तिरस्त्विति न च द्रव्यवति द्रव्ये सति रवीकारेउत्पत्तेः । द्वितंतुकस्य तत्रैव पुनरुत्पत्तिः स्यादिति वाच्यं तस्या
गभावस्यनष्टत्वात् ॥ तयोः संयोगान्तरात्माबीद्वितंतुकपटस्तु तदानीस्य धनेः ॥ तत्र संयोगांतरस्यपू राम
र्वपटध्वंसस्यवाहेतुत्वात् ॥ अन्यथा प्रथमंतवापिककथं नाग्रिमद्वितंतुकोत्पत्तिः एवंचरमतंतुकोत्प

त्पत्तिर्चरमतंतुसंयोगवियोगक्रमेण नाशे नवतंतुकाद्युपलब्धिर्निर्बाधा प्रथमतंतुसंयोगवियोगक्रमेण
नाशे वास्तु तव वदशतंतुकनाशानंतरं नवतंतुकोत्पत्तिरस्तु वा दशमतंतुकोत्पत्तिकाल एव चरमतंतुपर्यंते द्वि
तीयतंतुमारभ्य नवतंतुकोत्पत्तिः । तथैवं तव प्रतिलोमक्रमेणानंतपटकल्पनापत्तिः । द्वितीयमारभ्य नवतंतुक
स्येव तृतीयमारभ्य नवतंतुकादेरेकशतंतुकादिध्वंसस्य हेतुत्वेमानाभावात् अन्यत्र प्रागभावाभावेनैवत
द्विरहोपपत्तेः । अथयत्किंचित्स्थानीयापत्तिविरहात्तद्व्यक्तित्वावच्छिन्नाभावस्य कारणत्वेनानतिप्रसंगो कि
मनंतरैकार्यकारणभावकल्पनेनेति चेत्तादृशायवच्छेदेनतत्वे नपटादिमत्वपितदुत्पत्त्यापत्तेः दीर्घतं
त्वादेर्वेत्रयुगमाद्यनुत्पत्त्यापत्तेश्च । अन्यत्र एकवाद्व्यक्तित्वावच्छिन्नाभावस्यतन्मद्रव्यत्वावच्छिन्नेहेतुत्वकल्पने
णः संयोगाद्रवत्थ्यापि द्वितंतुकादिमति त्रितंतुकाद्युत्पत्तिर्निर्बाधायुक्तं चैतत् अन्यथा द्वितंतुकपटा
दिमति तत्वतरेदिसंयोगादेकतंतुकपटोत्पत्तौ द्वैरूप्यापत्तेः । अत्रैवाप्यत्रोत्पत्तौ एकः पटइत्यादिप्रतीतेर्लौके
सत्वादेतत्याव्यवहारायपरस्यैकाभिद्धिः नहि नानापटाः प्रतीयंते व्यवह्रियंते वेति । अत्र गुणीभूतलसं

प.मा. पेभावच्छेदेन पाणपाघनंतसंयोगानुपलब्ध्यादिवद्रविभ्यतीति चेत्रातत्रपुनात तत्रानाले तदनुपलब्धेरे:
मारप्राशिवशातुंपपयत्नेः न वा त्रापित थ्यामहापटकाले द्वितंतुकादेः स्वीकारे तंत्वाकाशसंयोगादितो: तं
तद्वितंतुककाशसंयोगारंभदूतंतुकादेः कर्मजसंयोगद्वित्वत्रित्वादेर्वीघाघतंतसंयोगादिश्रकल्पनामपेक्षातेषां
नाशासद्धविद्भावस्यकारणत्वाद्दोषः। वस्त्रयुग्मादिष्ववहारस्तु भाविपरपरतयायथाघः। एकतं
तुकादिविरहास्तु विद्व्यद्व्यस्यविजातीयसंयोगसंबंधनतस्यद्रव्योहेतुत्वात्‌। एतेनएकतूस्येवततोत्रीतुकटि
लमावाघः परोजायतेतेरसमवायिकारणानवतंतुसंयोगः तंतो: स्वस्मितत्वावयवेवासंयोगासंभवात्‌ किं
तुतंतोरवयवानामभावात्‌ संयोगादिति तंतुशालिष्वप्सु खेव समपरोजायते एकतंतुकव्यवहारस्त्वेकतंतो:
वयवेष्ववगाततंतुतात्रत्रस्तु वायिरश्मिशरीरमयुक्तः पाशिरितिप्रसमार्दुनावमवावच्छेदावयविसंयोगाप्य
वयवेत्याचांशुतंतुसंयोगएवतत्पटस्यासमवायी समवायीतुतंतुरेवनंतुत्वेनपटंप्रतिसमवायिकारणत्वा
तपरिमाणप्रकर्षस्त्वसमवायिसंयोगाश्रयबहुत्वादितिमतमप्यपास्तं। निर्द्रव्यद्रव्यसंयोगास्ततत्रासं पम०

भवात्तावेमाघभिघातात्त्रुटेमहातंतौखंडतंतुष्वेवतत्पटोत्पत्तेः। अन्यथातुपटसंस्थानसारूप्याद्
न एव पटप्रत्ययः। इत्यलमप्रकृतेन। नन्वत्राचार्याः परमाणुभिरेव बहुत्वोपेतैर्महाद्रव्यारंभे गोघटादिर
प्यारभ्यतां। तथा चोत्तरालिकात्याल्पतरकार्योपलंभविरोधः। अणुकवत्त्रैगोघटादेरप्यनुपल
घोरखोपरेवः स्याद्वा ईत्यत्र संस्थानभेदानुपपत्तेस्तत्रिपतघटत्वाद्यपि न स्यात्‌। अत्र यद्यणुकैर्महदारं
भेपि समानोपमनुयोगः। द्व्यणुकैर्बहुत्वोपेतैस्त्र्यणुकमेवारभ्यते इति चेत्‌ परमाणुभिरपि बहुत्वोपेतै
स्त्र्यणुकमेवारभ्यतेइत्यपितुल्यं। अत्रोच्यते। यथावयवावयविभावः परमाणुषु विश्राम्यति तथावयव
महत्त्वापकर्षो द्वित्वे विश्राम्यति। एकमात्रस्यारंभकस्य संयोगाभावेनानारंभकत्वात्‌ तथा च द्वाभ्यां परमाणु
भ्यामारब्धद्व्यणुकैस्त्रिभिर्द्व्यणुकैस्त्र्यणुकं द्व्यणुकाभ्यां तु नारंभः प्रयोजनाभावात्‌। तदारब्धे महत्त्वायोगा
दित्याहुः। द्व्यणुकाभ्यामारब्धेपि द्विकपालकघटवन्महत्त्वं संभवतीति तुल्ये पमिदं तुर्वित्स्य परमाणु
भ्यामारब्धेप्यस्तु पहत्वं परिमाणत्वेनैव महत्त्वासमवायिकारणत्वो विस्मात्‌। अत्रस्तु वा द्विकपाल

प॰मा॰ कघटमहत्ववत्तद्वित्वमेवत्र्यणुकमहत्वस्यासमवायिकारणं नच दृष्टांते सासावयवं यत्रावयवग
तबहुत्वमेव हेतुः गौरवात्। अस्तु या त्रिभिः परमाणुभिरेव त्र्यणुकं। परमाणुभ्यामनारंभकत्वमिति द्वी
तिनाद्व्यणुकाभ्यामनारंभ एव अवांतरपरिमाणभेदकल्पने गौरवाभावाभावाद्बहुत्वलवलेनत्र्याण
मेव युगपद्वित्वजातीयसंयोगकल्पना तावस्तु तो नवास्रं भेदरूपमाणानां द्व्यणुकत्वमेव युक्तमणु
त्वपारः त्वलेलाघवादिति। मीमांसकास्तु परमाणुद्व्यणुकयोर्मानाभावेन त्रुटावेव विश्रामात् त्रुटिम
हत्वं नित्यमिति न तत्कारणपरिचिंतनं न च गगनमहत्वावधिकापकर्षस्य बहुत्वजन्यतावच्छेद
कत्वे कथं तत्रिसत्वात्रुटिमहत्वावधिकोत्कर्षस्य सांकर्यापत्त्या तस्यानुगतस्याभावात् तादृशकार्य
कारणभावे मानाभावादन्यथा त्रुटिमहत्वावधिकोत्कर्षस्य तज्जन्यतावच्छेदकत्वात् गगनमहत्वादे
रपि तज्जन्यत्वापात्तेर्त्वेत्याहुः। इंधनादावपि वन्ह्यारंभकपरमाणुसत्वं कथमन्यथा स्वल्पवन्हि राम॰
योगात् तत्तद्रूपादौ महावन्ह्युत्पारः कथं वा पाषाणेंधनादिसंघर्षणाद्वन्ह्युत्पारः। तथाच पर

माणेप्रतींद्रियत्वमुचितं। योग्यानां तु उद्भूतस्पर्शभास्वररूपवत्तेजस्त्र्यणुकानां तत्र सत्वे महांधं
धकारे तत्संसर्गीधनानां तेषां च प्रत्यक्षापत्तेस्त्र्यणुकं न त्र्यणुकमिति चेन्नेदं परमाणुमहतोर्व्यंजकत्वनियमा
दिति अनुभवबलेनैवान्वेषणः यथाः। अतितत्स्फटिकादौ अनुद्भूतरूपवद्भिरभिभूतरूपवद्भिरेव वा तत्र म
हावन्ह्युत्पादस्तथाहुः। अवयवविनिमानाभाव इति चेन्न। तथाहि विलक्षणसंस्थानविशिष्टैरणुभिरेव
घटादिव्यवहारोपपत्तौ किमतिरिक्तावयविना न चावयवेन योग्या घटादयस्तु योग्या इति विशेषः। द्व
रस्योग्यानामपि केशादीनां सजातीयसंवलनेन योग्यत्ववत् तद्योग्यत्वोपपत्तेरिति चेन्नाणूनां स्वभा
वतो योग्यानां सजातीयसंवलनेनापि योग्य वासंभवात् केशादीनां तु न स्वभावतो योग्यत्वं किंतु दूरत्वे
नेतिन्वयरेषां चक्षुषा मेरावादिना मयोग्यादृष्टिपरमाणोर्योग्यपरमाणोरुत्पत्तिस्त्वद्व्यणुकाद्यणु
कवदिति वाच्यं अक्षरणा भंगनिरासान्न। परमाणूनां नित्यत्वान्महत्त्वोद्भूतरूपवत्वेनैव द्रव्यस्य योग्य
त्वात्। अन्यथा विशेषाचार्यैरपि प्रत्यक्षतापत्तेर्न तथा च पार्थिवसूत्रं। नोतींद्रियत्वादणूनामि

प·मा· २०

।मतिसंप्रदायः। अत्र नव्यनास्तिकाः संतु अणवो नित्यास्तथापि संयुक्ताणुद्वयं पंचाणुकं संयु
क्ताणुचतुष्कं त्र्यणुकं संयुक्ताणुचतुर्विंशतिकं चतुरणुकमित्यादयस्तु लौकिकविषयितया द्रव्या मा
त्रालोकारत्वावच्छिन्नत्र्यणुकत्वादि घटकसंयोगानां विशिष्टचत्वारि घटकसंयोगभिन्नानां वैजात्ये
नैकाथ्यगुणत्वावच्छिन्नकेवलाणुघणुकादेः प्रत्यक्षता। न च वैजात्यकल्पने गौरवं तथापि द्रव्या
रंभकतावच्छेदकत्वेनाभिमतस्य वैजात्यस्यैव समपाद्यणुकविशाचाघारंभकत्वेन त्वदभिम
तसंयोगव्यावृत्तत्वस्वीकारात्। तत्तदनुभूतरूपत्वादिकल्पने गौरवाच्च। न च विजातीयसंयोगस्य
द्रव्यत्वमेव जन्यतावच्छेदकं लाघवात् तदुद्भासाक्षात्कारत्वमनंतावयवितत्संयोगसाध्वंसदिक
ल्पने गौरवं तु फलमुखत्वान्न दोष इति वाच्यं। फलमुखगौरवस्यापि क्वचिद्दोषत्वात्। जन्यद्र
व्यत्वमपेक्ष्य द्रव्यलौकिकसाक्षात्कारत्वस्य लघुत्वात्। तथा महत्वोद्भूतरूपयोस्तदवच्छि
न्ने हेतुत्वस्य कल्प्यतया चक्षुःसंयोगस्यैव केवलाणुचक्षुःसंयोगव्यावर्तकवैजात्येन हेतुत्वसंभ राम०

वाच्चतादृशसंयोगविशिष्ट। इन्द्रियत्वादिकं गुणादिप्रत्यक्षे तंत्रमिति केवलाणुत्वकादिगुणाप्रत्यक्ष
त्वेपि न त्र्यणुकादिगुणाप्रत्यक्षत्वं। एतेन योग्यानां रूपादीनां गुणानां कर्मणां चाणुसमवेतत्वाद प्र
त्यक्षतापत्तिरित्यप्यपास्तं। अणुगुणानामप्यधिकदाविभिमतत्वात्। न चैतन्नामैव पटरूपादिधी
नैस्यात् स्याद्वा तथापि तत्तद्दित्यादिकमपीति वाच्यं। फलवत्वेन विलक्षणसंयोगवत्वरूपतत्वादौ रव
विलक्षणसंयोगवत्त्वरूपपटत्वादिविशिष्टाधारतावच्छेदकत्वस्वीकारात्। पटरूपत्रः पटोवि
नष्टरूपादिप्रत्ययस्त्वाशिकी चित्रनष्टरूपादिप्रत्ययवद्विशेषणस्य पटत्वादिघटकसंयोगस्योत्पाद
विनाशविषयकः। एवं देनोत्पादप्रतीतिः परमाणुपुंजोत्पादादिरवीकारेण कस्य पटादेहेतुत्पादा
दिकल्पनेच युक्ता। परं परस्परासंयोगनाशस्तत्प्रतीतिविषय इति चेन्न दादिनाशदशायां विषा
घमानस्यापि तत्वादेर्नाशप्रत्ययापत्तेः परंपरासंयोगविनाशस्य तत्वादाव पिसत्वादित्यासं
तेनं तु नष्टरूपादिप्रतीतेविशेषणीभूततंतुघातदेदकसंयोगनाशविषयकत्वात्। अत्र यथा श्रिखी

नष्टइति वक्ष्यमाणनाशकाले विघटमानदंडशालिनि दंडीइति मत्यपापत्तेस्तत्रापि दुर्वारत्वात्। एकःपटइ
तिप्रतीतिः। एवं कंवनमिति वत्पमेदे एकत्वविषया।। एतेन पटो महानिति प्रतीत्यनुपपत्तिः। आरा॰नां
महत्त्वासंभवादितिपरास्तं।। संयोगविशेषस्यैव महत्त्वरूपत्वान्महत्त्वस्य संयोगत्वव्याप्यत्वादिति म
हानूषाणशिरस्त्वादिप्रतीतिरप्यमेव सूर्पपदाणुरावेव विश्राममेतु त्रुटिपुंजएव घटादिरितिनाउ
पपत्तिलेशोपि।। अथ मेमां मुक्ति वयोगनाशात्तनुनाशस्तत्राशात्पटनाश इति संभवति न तु
तत्रापीति चेन्न विलक्षणसंयोगवत्ताव्द्यणुपुंजात्मकस्य पटस्य पक्वि चित्संयोगनाशेपि नाशात
पत्। किंचिदणुक्रियवात्तंतुत्वपटत्वादिघटकसंयोगानां युगपदेव नाशोऽस्तिलाघवान्न हि
क्रमेणनाशे लाघवमनुभवो वेयमद्धुन्नत्तदस्तु विलक्षणसंयोगवनावद्यणुत्वस्य परत्वादि
रूपत्वेनावत्स्यलक्षणत्वादिरूपस्य प्रतीति संधानं विना पटत्वादिप्रत्ययो न स्यात्। विलक्षणविलक्ष
णसंयोगवत्त्वादिकमेव पटत्वं तंतुत्वादिकमेवेति चेन्न पटपदघटाद्यारंभकं तंतुकपालादेरारंभक राम॰

स्याऽणुकपालिकादेनोपिपितत्वमतेतैर्घटपटाद्यारंभकविजातीयसंयोगस्तत्वे पटादिप्रतीत्यापत्तेर्नन वत
दातद्विजातीयसंयोगनाशःततद्वंछेदकावच्छेदनेतंतुकपालादिक्रियाबलादिक्रियाभावात्। किंच तंतुसं
योगात्पटउत्पन्न इत्यादिप्रतीतिव्यवहारापायाव्यापत्तिः। अपि च तंतुत्वादिभेदग्रहं विना तत्संयोगग्रहा
भावेपि पटत्वादिप्रतीतेर्न विलक्षणसंयोगवत्त्वं पटत्वादिकं। मितिसंयोगत्वेनोपस्थिते भेदग्रहापेक्षाल
तुपटत्वादिघटकवैजात्येवत्यपिकप्रिर्वत्। अथैवं घटत्वादेर्जातित्वानुपपत्तिः। मृत्स्वर्णरजतपा
षाणादिघटेषु मृत्वस्वर्णत्वादिना सांकर्यादिति चेन्न। मृत्वस्वर्णत्वादिव्याप्यस्य नानाघटत्वादेः
स्वीकारात्। न च घटत्वादिव्याप्यमृत्वाद्येवनानास्तु तद्भिन्नास्वर्णत्वमृत्वादिकल्पनापत्तेः। कुलाल
स्वर्णकारादिजन्यतावच्छेदकतया मृत्वस्वर्णत्वादिव्याप्यनानाघटत्वादेरावश्यकत्वात्। मद्भिस्वर्ण
घटादौ चक्रादिकं मृत्घटादौ लोहवर्तुलादिकं हेतुरनुगतधीस्तु कथंचित्सादृश्यात्। घटपदं तु
नानार्थं। पटघटे त्वदं तत्वादिकमेकत्वविनिकायकारणतयावच्छेदकं मृत्वादिकमेवचारकत्ववृत्ति।

प·मा· ३२

घटत्वादिकं तु सोऽवयवोद्भवप्युपष्टंभकष्टपि वीवृत्तिकापेक्षारणाभावानां बहूनां साक्षात्कारानाधिकर
णावच्छेदेवितयानकुलालस्वर्णकारादेर्विजातीयकृतिमत्त्वेन चक्रादिलोहवत्तुलादेस्यकथंचिद्वि
जातीयसंयोगव्यापारकमयो न कतेनहेतुत्वं अन्यथा वक्रादिकविनाकविनादादिघटादेरुत्पत्तेर्व्यभि
चारोदुर्वारः। अथ घटत्वादिकं रूपादिवृत्तेव किं न स्यादिति चेत्तस्यानानीलत्वतिक्तत्वसुरभित्व
कठिनत्वादिनासांकर्यात्। द्वित्वद्विपृथक्त्वयोरनंतत्वात्। व्या अपभेदाघग्रहेऽप्यग्रहाच्च। एकपृथ
क्त्वस्यावधित्वानवच्छेद्यत्वे न विलंबितोपस्थितिकत्वात्। न च मतेयत्वाभावाच्च।। अत एव न परत्वा
पातित्वंत्रएकत्वसैस्यात्। दोषादेकत्वाग्रहेपि घटत्वादिग्रहाच्च। न च सुः संयुक्तेस्या अपसेवं
धेन वृत्तित्ववत्। दर्शनात्। स्त्यात्वमपि प्रामाणिकं चेत्तदोषायेति घटत्वादिकं जातिरेवानु
गतमित्याहुः। तस्माद्रक्तगंधादिलक्षणसंस्थानावच्छेदेनासन्निकर्षात्तद्द्रव्यगतघटत्वादि
ग्रहस्तत्रोक्तेरुण्याद्विनाशभेदादिप्रत्ययानुपपत्त्याऽवयवीपृथगेवेति सिद्धं। अथावृत्त। रामः

त्वानावृत्तत्वविरुद्धधर्माध्यासादेवावयवीभिद्यतां न चावच्छेदकभेदादविरोधः गतद्वेद्वौ हृते प्यवय
विनीन्द्रियसन्निकर्षस्मि त्वेपरिमाणादिग्रहप्रसंगादिति चेन्न परिमाणादिमात्रग्रहस्य दृष्टत्वात्।। त
द्गतद्गतहेवितत्वस्तित्वादिजातिग्रहे तु यावदवयवावच्छेदेन सन्निकर्षो हेतुः। अस्तु तर्ह्यापि सकंपत्वनि
ष्कंपत्वाभ्यां भेदः ग्रहशयनेहि पाणौ शरीरं सकंपं निष्कंपं चरणेन चकंपत इत्याभावे फ त्र विरोधात्।। क
र्मणास्तव्याप्यवृत्तित्वादिति शरीरं भिन्नमितिचेन्न। पाणावेव तत्र कंपस्वीकारात्।। कंपेहस्ताभिघा
तादेः फलबलात्पाणावेव कल्पनात्। पाणौ शरीरं चलतीति धीस्तु पाणिवृत्तिकंपस्य परंप
रासंबंधविषयासाक्षात्संबंधविषयकत्वे भ्रम एव।। न च साक्षात्संबंधे बाधकाभावात् परंपरासं
बंधविषयकत्वं भ्रमत्वं चासिद्धं अन्यथा सकंपमेव शरीरं निष्कंपधीस्तु चरणवृत्तिकंपाभावस्य
परंपरासंबंधविषयिणी त्येव किं न स्यादिति वाच्यं पाणिकर्मणोव शरीरं चलतीति प्रत्यक्षाभ्युप
पन्नाव्यतिरिक्तशरीरकर्मकल्पनापे गौरवस्येव बाधकत्वात्। कंपाभावस्त्वन्यत्र क्लृप्त एव शरीरे

प.मा. ३२

कल्प्यते स्मृतिनगौरवान्नैवं कर्मणः शरीरमात्रगतत्वं तु रिमात्रगतत्वं वा स्यात्। तत्त्वः कर्मणो वान्यत्र प्रत्ययाप
यत्नेरितिवाच्यं। सर्वावच्छेदेनोपलम्भमावकर्मघातिशरीरादौ कर्माभावोपलंभप्रसंगात्। एतेनास्तु शरीरादौ
अत्यावयवविन्येव क्रियास्ते वहि पाराणादिनानावयवप्रतीयतेनानावयवे क्रिया कल्पने गौरवमिति यथा।
स्तंपारणादौ कर्माभावोपलंभापत्तेः। परंपरासंबंधस्य दोषत्वेच शरणादावपि तस्यनापत्तेः दोषत्वकल्पनागौ
रवाच्च। किंच पाराणाद्यवयवावक्रियैव परंपरयावयविनि शरीरादौ संयोगः संभवति न तु शरीरादि क्रियया
पाणादौ। नचैवं शरीरस्य निष्कंपत्वे चरणे शरीरं न चलतीतिवत्पाणौ न चलतीत्यपि स्यादिति वाच्यं। श
रीरत्वादेरिव पाणौ कर्माभावान्वच्छेदकत्वात्।। अथैवमस्तु कथं कायादिनिष्ठसंयोगादेरव वृक्षादौ प्र
तीसंभवे संयोगाद्यधिकरणावृत्तेर्वास्त्विति चेत्। अत्र स्वावच्छेदेन तत्स्य तद्धस्संयोगादपि पटोत्पत्ते ग
नचाश्रयसंयोगादशावेव पटोत्पत्तिः। तंतुत्वेन पटसमवायितादिति प्राचीनमतनिष्कर्षे अनया
स्त चलति शाखा समुदायेन अवलेपिमूलो वृक्ष चलतीत्यस्य बाधितप्रतीतिः कर्मोत्पाद्य वृत्तापि स राम०

विषयावृत्तित्वाच्च वृत्तित्तां तेरव्याप्यवृत्तितीत्वाभावनियमस्य प्रयोजकत्वाद्दृष्टिः। इत्यमेव साक्षात्संबंधे
नवृक्षादौ मूलाद्यवच्छेदे न चलनाभावाव्यवहा। इत्यामाणयमित्याहुः। इदमप्यत्र विचार्यते किमसतः क्रि
यते सदेवा वा सक्रियते इति सांख्याः।। तदाहुः। असदकरणादुपादानग्रहणात्सर्वसंभवाभावात्।। श
क्तस्य शक्यकरणाभावाच्चासत्कार्यमसतः शशविषाणादिः सतस्य कर्तुमशक्यत्वात् कर्तुमशक्यत्वा
त्। सतस्तु वहि सत्करणं तत्त्वमेवात् दर्शयति लेपसतस्त्वेनैव स्वेनिःपीडनेन करणं चासतस्तु करणे
न निदर्शनमनुपादानेन ग्रहणात्संबंधादपि सत्कार्यं न ह्यसतः संबंधोस्ति अत्र संबंधमेव कार्यकार
णेः क्रियतेरीतिचेच्च। सर्वे संभवाभावात्। असंबंधाविशेषसर्वसर्वस्मात्संभवेत्। नचैवंतास्मात्का
र्यप्रागुत्पत्तेः कारणेन संबंद्धं। यथाहुः। असत्वान्नास्ति संबंधः कारणैः सत्वसंगिभिः। असंबद्धस्य
चोत्पत्तिमिच्छतो न व्यवस्थितिः।। किंच शक्तस्य तत्र कत्वेति प्रसंगात् शक्तस्य तत्त्वं वाच्यं।। शक्ति
असस्य सर्वत्रत्वेयवाति प्रसंगात्। किंतु कचिदेवेति कयमसति कार्ये कारणस्य शक्तिर्नियतास्या

तत्र सतो विषयत्वायोगात्। तस्मात् शब्दस्य शक्यं शक्तिविषयोपलक्षणात् प्रागपि शक्यं मंदे वा किं
चकारणाभावात् कारणतादात्म्यादपि सत्कार्यं। न। घटवपदीत्र व पटेभ्यो न्यस्य त्यापत्तीत्यभावात्। कपा
लं घटीभूतं तंतुः पटीभूतः स्वर्णं कुंडलीभूतमित्यादिप्रतीतेः। अत्रोच्यते। पटादिकारणव्यापारात्
प्रागपि पटसत्वेषु सत्त्वेष किमिति कपलादिकास्योत्पत्तिस्य सत्वामपि तिलाप्येषां नोपलभ्यते अत्र नो
विर्भूतत्वादिति चेत्। कोयमनाविर्भावः उपलब्ध्यभावश्चेत् वैदेवानुपलंभापत्तिः स्थोत्पत्तेः प्राक्
स्वाभावसत्वात् अत्मा अयमसंगात्मा प्रश्नोपलब्धियोः स्यार्थक्रियाकारित्वविरहोऽनाविर्भावइ
ति चेद् सत्कार्यवादः इदं रूपस्य प्रागसतः प्रश्नाभावात्। न च घटादेः प्रागपि कोप लब्ध्यनुपल
ब्धिमात्रं पटस्य वातेघ्यति व्यंजकाभावान्नतो प्यनुपलब्धिरिति वाच्यं॥ कारणसमुदायादेः प्रागस
त्वे सत्कार्यवादात्। सत्वे तु प्रागुपलब्ध्यापत्तिः प्रागत्वे वाविर्भूतो व्यंजक इति चेत्। न चाविर्भाव
स्यापि सत्त्वस्य द्विकल्पग्रासात्। विपद्यमानप्रागभावप्रतियोगित्वं स्य चेत्तेमा न कालासंबंद्धत्वस राम॰

त्वासत्वस्य विद्यमानत्वस्य सत्वस्य च न मिथो विरोधः। कालभेदेनैकत्र समावेशात्। उपादानेन स सं
बन्धस्य संबंधोपिति स्वत्वाच्चानुपपत्तेः शक्तिः कारणतामात्र चासतोपि पटादेः तंत्वादौ वैरस्व
भावात्। शक्तिनियमोपि स्वभावभेदस्यैवाश्रयणीयत्वात् कार्यकारणयोश्च मिथो भेद एव अन्यथा
कार्यकारणभावस्यैवानुपपत्तेः। अस्थैवं शतमाषकेभ्यः शतमाषकारब्धेऽवयविनि गुरुत्वाधिक्यस्य
प्रसंग गुरुत्वावनतिविशेषः स्यादिति चेत्। गुरुतरद्रव्ययोः समयोस्तुलने एकत्र संलग्नतृणा
दिगुरुत्वाधिक्यात् स्वन्नवनाति वद्धयपत्तेः। अवयविन्यतंतापकृष्टगुरुत्वस्वीकारात्। अत्र स्व
वापरमाणावेव गुरुत्वं द्व्यणुकादेरक्षः संयोगस्य गुरुत्वसापेक्षयात्तज्जन्यावयवबेगात्त वेगाधी
नक्रियया तत्व व्यवहारस्तु वस्त्रिस्यदीपयात्त च व्यवहार एव हीरणाः न च नोदनाभिघातसापेक्षया
स्वपात् क्रियायो वेगजनकत्वं न तु गुरुत्वसापेक्षायाः गुरुत्वादेवोत्तरोत्तरकर्मसंतानसंभवादि
ति वाच्यं। अथः संयोगस्य द्विविधाभिघातात्मकस्य चिरं वेगमसंभवात्। वेगेन पततीत्या

दिव्यवर्हिरासंज्ञा। नचैवं महावयवविभागे तेमहाविलंबो मिथोविश्रामावयवानां मिथोविष्टंभावयवानां
मिथोविष्टंभाधीनक्रियातन्यवेगेनांसावयवविनिहतवेगसंभवात्॥ अल्पावयवपरमाणसंवंधविशेष
णावापरमाणुगुरुत्वमेवपतननियामकं। गुरुत्वंस्वंबामान्नाभावः। वायुतेजसोस्तिर्यगूर्ध्वगमनवत
वायवः पृथिव्यार्वागमनस्याप्रतिप्रतिवंधकेदृष्टत्वात्। मंसंयोगादिनैवोपपत्तेः। पतनप्रकर्षस्तु अ
वयवाधिक्यात्। अवयवविनिगुरुत्वायकर्षेन्नपातितत्वे चवाच्यत्वात्॥ अथावयवावयविनोर्गु
णगुरुत्वपातेस्तु भेदेप्यभेदोस्तु॥ समवायस्थानीयस्यतादात्म्यस्य भेदेपि संभवादिति चेत्। आ
त्माकाशादेर्हीनशशशृङ्गादिनातादात्म्याभावात्। घटोनीलिमसात्यादिप्रतीत्यापत्तेश्च। अलमत्रवि
स्तरः॥ कार्यं त्रिविधं शरीरेंद्रियविषयसंज्ञिकं॥ तत्र शरीरं द्विविधं योनिजमयोनिजं च। योनि
जं शुक्रशोणितसंनिपातजं तदपि द्विविधं शरीरेंद्रियविषयसंज्ञिकं॥ तत्र शरीरं द्विविधं। यो
निजमयोनिजं च। योनिजं शुक्रशोणितसंनिपातजं तदपि द्विविधं जरायुजमंडजं च रामः

॥मानुषपशूनां जरायुजं। पक्षिसरीसृपाणामंडजं। अयोनिजं देवर्षीणां शरीरं धर्मविशेषसहितेभ्योऽणु
भ्यो जायते स्वेदजं तु न। तथा च शरीरं अधर्मविशेषसहितेभ्यस्तेभ्य इति। ननु योनेः शरीरहेतुत्वात्कथं
तं विना शरीरमिति चेत्। शरीरत्वस्योष्मजत्वं मिमक्षिकादयो योनिजसाधारण्येन व्यभिचारात् शरीरत्वा
वच्छेदेन हेतुत्वाभावात्। शरीरविशेषे तद्धेतुत्वं च न बाधकं। अपि च ब्रह्मणो मानसा मरीच्यादयः पुत्रा इ
ति किंचस्वर्गिणां गर्भवासादिवेदनावत्त्वं तारकिणां चानुषंगिकयोनिस्पर्शसुखवत्त्वं विरुद्धमिति न
तत्र योनिजत्वं। न च तेषां गर्भवासादिकं मवेदनाहेतुः दृष्टविपरीतकल्पनापत्तेरिति कर्मैव सत्संयोगचमो
गनिर्वाहकं शरीरमजं पति। येन नु कर्मणा गर्भवासादिदुःखमपि भोजितं तद्वयोनिजसृष्ट्याधते इति
विशेषः। अयं तथापि शरीरं न पृथिवी निदाघोष्मणा द्रवीभावेन जलवद्घनत्वात् हिमवत् न जलं ग
धवत्त्वेन पृथिव्यारब्धत्वात्। अत एव च नं ते नः प्रभृतयपि लिंगं पृथिव्यादि विजातीयं भूतचतुष्कप्रकृ
तिरं अकत्यम्। तत्त्वं च गंधद्रवीभावकरादिसंयुक्तं। समरूपाद्विपरीतानि हेतु स्वस्वगुणवत्त्वं कपक्षा

त्त्वेनाप्यसिद्धं यद्यप्यवकाशविषयत्वादाकाशप्रकृतिकत्वमपि युक्तं ॥ अत एव शरीरं पांचभौतिक
मिति प्रसिद्धिः ॥ तथाप्याकाशस्य निःस्पर्शत्वेन विभोरेकस्यापूर्वद्रव्यारंभकत्वानुपपत्त्यासमवायित्वं तृति
चेत्तत्र यासत्तिकृत्स्यात् पृथिवीरूपादिकं प्रति तदितररूपादेः प्रतिबंधकत्वात् शरीरस्य नीरूपादि
त्वापत्तेः न च नीलपीतकपालारब्धवत् चित्रं रूपं वक्तुं शक्यं तत्र यापि रसाद्यनुपपत्तेः नीलपीता
दिवत् पृथिवीजलादिरूपाणां चित्ररूपजनकत्वं स्यादिष्टत्वं स्यादिष्टत्वाच्च यत्तु निर्गंधेनागंधो
त्पादनं लीलावत्युक्तं विरुद्धमवयवगंधेनावयविगंधोत्पादस्य वयवान्तरवृत्तिनागंधाभावविवक्षा
वितुमशक्यत्वात् इति दीधितिकृतोक्तं तच्चिंत्यं सौरभासौरभादितरगंधकत्वे विरुद्धगंधवदारब्धनि
र्गंधसगंधाभ्यामारब्धे व्याप्यवृत्तिगंधापत्तेः सौरभासौरभावत्स्पर्शत्वादिजातिः किं च पृथिवीजलादेः
पृथिवीजलादिकं प्रत्येव जनकत्वं। न हि नीलपीतादेश्चित्रं न जनकत्ववद्विजातीयजनकत्वं प्रसि
द्धं तेषामारंभकत्वेन पृथिव्यादेः पृथिव्या घनारंभेपि विजातीयारंभकत्वं कथंचित्कल्प्यतेति न किंचिदेतत् ॥ राम०